## खण्ड – III

## भाषा – II

## संस्कृत

अत्र त्रिंशत् प्रश्नाः सन्ति ।

सर्वे प्रश्नाः समाधेयाः ।

अधोलिखितम् अपठितं गद्यांशम् आधारीकृत्य निम्नलिखिताः ( 61 - 66 ) प्रश्नाः समाधेयाः –

गृहस्य सुशिक्षिता स्त्री सद्गृहिणी गृहलक्ष्मीः गृहस्वामिनी वा भवति । सैव मातृभूता सद्वंशं सन्नागरिकं च निर्मातुं प्रभवति ।

स्त्री एव समाजे धार्मिकसंस्काराणां सद्गुणादिकानां स्थापनं करोति । अतः समाजे राष्ट्रे वा स्त्रीणां समादरो मातृशक्तेश्च गौरवरक्षणं तदैव सम्भवति यदा ताः सुशिक्षिताः स्युः ।

61. 'मातृशक्तेः' इत्यत्र का विभक्तिः ?
   - (A) चतुर्थी
   - (B) षष्ठी
   - (C) सप्तमी
   - (D) तृतीया

62. 'प्रभवति' इत्यस्य लङ् लकारे रूपं भविष्यति –
   - (A) प्राभवत्
   - (B) अप्रभवत्
   - (C) प्राभूयत्
   - (D) प्राभवत

63. 'तदैवः' इत्यस्मिन् पदे कः सन्धिः ?
   - (A) गुण सन्धिः
   - (B) यण् सन्धिः
   - (C) वृद्धि सन्धिः
   - (D) अयादि सन्धिः

64. 'निर्मातुम्' इत्यस्मिन् पदे प्रत्ययः अस्ति –
   - (A) तुन्
   - (B) तुम्
   - (C) टुम्
   - (D) तुमुन्

65. 'गृहलक्ष्मीः' इत्यत्र समासः अस्ति –
   - (A) द्वन्द्व
   - (B) अव्ययीभावः
   - (C) तत्पुरुषः
   - (D) बहुव्रीहिः

66. "समादरो" इत्यस्य पदस्य सन्धि-विच्छेदः भविष्यति –
   - (A) सम् + आदरः
   - (B) समा + आदरः
   - (C) स + मादरः
   - (D) समा + दरः

www.MDSmartClasses.com



Scanned with CamScanner

अधोलिखितम् अपठितं श्लोकम् आधारीकृत्य निम्नलिखिताः **( 67 - 72 )** प्रश्नाः समाधेयाः –

शौर्याधिदैवतविहारवनस्थलीयम्
एषा कवीश्वरगिरां वररङ्गभूमिः ।
अत्युत्तमा च बलिनां कषपट्टिकेयम्
श्री चित्रकूटनगरी ननु दर्शनीया ।।

67. 'अत्युत्तमा' इत्यत्र कः सन्धिः ?
(A) गुण (B) यण्
(C) दीर्घ (D) अयादि

68. 'दर्शनीया' इत्यत्र कः प्रत्ययः ?
(A) यत् (B) ण्यत्
(C) तव्यत् (D) अनीयर्

69. श्लोकेऽस्मिन् प्रयुक्तस्य छन्दसः नाम किम् ?
(A) मालिनी (B) शिखरिणी
(C) वसन्ततिलका (D) इन्द्रवज्रा

70. 'विहारवनम्' इत्यत्र समासविग्रहो विद्यते –
(A) विहाराय वनम् (B) विहारं वनम्
(C) विहारस्य वनम् (D) विहारेण वनम्

71. श्लोकेऽस्मिन् कः अलंकारः प्रयुक्तः ?
(A) विभावना (B) रूपक
(C) उपमा (D) निदर्शना

72. माहेश्वरसूत्रेषु 'शल्' वर्णानां क्रमः विद्यते –
(A) श स ष ह ल् (B) श ष ह स ल्
(C) श ह ष स ल् (D) श ष स ह ल्

73. 'देवदत्त यज्ञदत्त का सौ रुपये का ऋणी है ।'
अस्य वाक्यस्य संस्कृते अनुवादः भविष्यति –
(A) देवदत्तः यज्ञदत्तस्य शतं धारयति । (B) देवदत्तः यज्ञदत्तं शतं धारयति ।
(C) देवदत्तः यज्ञदत्ताय शतं धारयति । (D) देवदत्तः यज्ञदत्तेन शतं धारयति ।

74. 'बालकः पुस्तकं पठति' इत्यस्य वाक्यस्य वाच्यपरिवर्तनं भविष्यति –
(A) बालकः पुस्तकं पठ्यते । (B) बालकेन पुस्तकं पठति ।
(C) बालकेन पुस्तकं पठ्यते । (D) बालकाय पुस्तकं पठन्ति ।



www.MDSmartClasses.com

Scanned with CamScanner

75. "सज्जनः आसने अधितिष्ठति" वाक्यमिदं संशोधयत –

(A) सज्जनः आसनमधितिष्ठति ।
(B) सज्जनः आसनेनातिष्ठति ।
(C) सज्जनः आसनं तिष्ठति ।
(D) सज्जनं आसने अधितिष्ठति ।

76. दण्डिनः पदलालित्यं माघे सन्ति .................... गुणाः ।
इत्यत्र रिक्त स्थानं पूरयित्वा सूक्ति संयोजयत –

(A) पञ्च
(B) त्रयः
(C) नव
(D) सप्त

77. 'र' कारस्य उच्चारणस्थानं विद्यते –

(A) नासिका
(B) कण्ठ
(C) तालु
(D) मूर्धा

78. अङ्कानां स्थाने संस्कृतपदेन समयं लिखत –
अहं प्रातः (4 : 15) .................. वादने उत्तिष्ठामि –

(A) पादोन चतुर्वादने
(B) सार्ध चतुर्वादने
(C) सपाद चतुर्वादने
(D) पादोन पञ्चवादने

79. 'मनुते' इत्यत्र क्रियापदे कः धातुः ?

(A) मह्
(B) मन्
(C) मान्
(D) मा

80. चतुर्दशमाहेश्वरसूत्रेषु स्वरवर्णानां संख्याः अस्ति –

(A) नव
(B) सप्त
(C) दश
(D) एकादश

81. संस्कृतभाषाशिक्षणस्य प्रथमं सोपानं भवेत् –

(A) धातुरूपाणां शब्दरूपाणां च रटनम्
(B) श्लोकानां स्मरणम्
(C) संस्कृतसम्भाषणम्
(D) व्याकरणावगमनम्

82. सूत्रविधौ सूत्राणां मुख्योद्देश्यं किम् ?

(A) पारायणम्
(B) कथाकथनम्
(C) उपदेशज्ञानम्
(D) घटेसमुद्रपूरणम्



www.MDSmartClasses.com
Scanned with CamScanner

83. "या भाषा अध्यापनीया सा स्वमाध्यमेनैव बोधनीया – यथा संस्कृतं संस्कृतमाध्यमेन आंग्लभाषा आंग्लमाध्यमेन" इति कस्य विधेः गुणः अस्ति ?

(A) कथाकथन विधेः (B) प्रत्यक्ष विधेः

(C) भाषण विधेः (D) प्रश्नोत्तर विधेः

84. "रुचेः सिद्धान्तसन्दर्भे यावत् छात्रेषु सक्रियरुचिर्न भविष्यति तावत् शिक्षकस्य सर्वोत्तमं कार्यं पूर्णं न भविष्यति" इति केन पाश्चात्यविदुषा कथितम् ?

(A) पिन्टसेट महोदयेन (B) हेराल्ड ई० पामर महोदयेन

(C) सुकरात महोदयेन (D) प्रो०डी०एस० कोठारी महोदयेन

85. एकैकस्य प्रश्नस्य पदेनैकेन वर्णनैकेन वा समाधानं प्रदेयं भवति चेत् सा का परीक्षा भवेत् ?

(A) शलाका परीक्षा (B) निबन्धात्मक परीक्षा

(C) वस्तुनिष्ठ परीक्षा (D) मौखिक परीक्षा

86. 'ध्वनीन् सम्यक् श्रुत्वा पुनः स्पष्टं वक्तव्यम्' इति कस्य कौशलस्य उपायः ?

(A) पठन कौशलस्य (B) श्रवण कौशलस्य

(C) कथा कौशलस्य (D) लेखन कौशलस्य

87. अल्पमूल्येनैव सुलभं दृश्यसाधनं किम् अस्ति ?

(A) ध्वनिमुद्रण यन्त्रम् (B) संगणक यन्त्रम्

(C) ध्वनिप्रसार यन्त्रम् (D) श्यामफलकम्

88. दूरदर्शन कार्यक्रमेषु संस्कृते 'अक्षरा' नामकः कार्यक्रमः कस्मात् स्थानात् प्रसार्यते ?

(A) बीकानेरात् (B) दिल्लीनगरात्

(C) जयपुरात् (D) उदयपुरात्

89. 'शिक्षणसूत्रेषु छात्राणां समक्षं उदाहरणानि प्रस्तूय नियमं प्रतिगमनम्' इति कस्य शिक्षणसूत्रस्य विशेषता ?

(A) आगमनात् निगमनं प्रति (B) पूर्णादंशं प्रति

(C) विश्लेषणात् संश्लेषणं प्रति (D) ज्ञातादज्ञातं प्रति

90. श्रवण-भाषण-पठन-कौशलानां मूल्यांकनं कया परीक्षया कर्तुं शक्यते ?

(A) निदानात्मक परीक्षया (B) मौखिक परीक्षया

(C) आसक्ति परीक्षया (D) लिखित परीक्षया



www.MDSmartClasses.com
Scanned with CamScanner